# Mahamayakritam Purushottama Stotram

# મહામાયાકૃતં પુરુષોત્તમસ્તોત્રમ્ ૯

## Document Information

Text title : Mahamayakritam Purushottama Stotram

File name : mahAmAyAkRRitaMpuruShottamastotram09.itx

Category : vishhnu, vishnu, lakShmInArAyaNIyasaMhitA, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 3 | adhyAya 71/10-25||

Latest update : February 28, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 28, 2026

*sanskritdocuments.org*

# મહામાયાકૃતં પુરુષોત્તમસ્તોત્રમ્ ૯

મહામાયા પ્રકૃતિર્યા સા માં સ્તૌતિ પુનઃ પુનઃ ।
“નમસ્તેઽક્ષરવાસાય પરમેશાય તે નમઃ ॥ ૧૦॥

અવતારસ્વરૂપાયાઽવતારિણે ચ તે નમઃ ।
માયાઽહં ભવતઃ શક્તિર્માયાલોકાશ્ચ તે પ્રભો ॥ ૧૧॥

ઈશ્વરાણામાલયાશ્ચ તવૈવ ભૂમિકાસ્ત્વિમાઃ ।
તત્ત્વાનિ ચ સમસ્તાનિ તવૈવ કાર્યકાણિ વૈ ॥ ૧૨॥

પુરાણપુરુષસ્ત્વં વૈ સર્વકારણકારણમ્ ।
શ્રીભૂલીલારમાનાથ માણિકીમુક્તિકાપતે ॥ ૧૩॥

પ્રજ્ઞાપદ્માવતીકાન્ત નમસ્તે સુખદાપતે ।
લક્ષ્મીપદ્માપતે તુભ્યં નમો નારાયણાય વૈ ॥ ૧૪॥

સર્વેશ્વરસ્વરૂપાય સર્વદેવાત્મને નમઃ ।
અનન્તમૂર્તયે કૃષ્ણનારાયણ હરે નમઃ ॥ ૧૫॥

તેઽચ્યુતાય ચ કાન્તાય પરમેશાય તે નમઃ ।
સર્વજ્ઞાય સમસ્તાય ગોપાલાત્મજ તે નમઃ ॥ ૧૬॥

સર્વસૃષ્ટ્યાત્મને તુભ્યં નમસ્તે પરમાત્મને ।
બ્રહ્મણે જ્યોતિષે તુભ્યં નમસ્તે શુચિવર્ચસે ॥ ૧૭॥

પ્રસવિત્રે નમઃ પિત્રે સર્ગસ્થિત્યન્તહેતવે ।
નારાયણાય ચ નમઃ સર્વાત્માન્તરવર્તિને ॥ ૧૮॥

અનન્તદિવ્યગુણવન્! નમઃ પુમર્થદાયિને ।
વ્યૂહરૂપાય ચ નમઃ પઞ્ચાવસ્થાસ્વરૂપિણે ॥ ૧૯॥

પ્રસીદ ભગવન્ વિષ્ણો સર્વલોકહિતાય વૈ ।
આત્માનો જ્ઞાનહીના વૈ નિરાકારા નિરિન્દ્રિયાઃ ॥ ૨૦॥

સર્વાનુષ્ઠાનરહિતા વર્તન્તે ચ નિરાશ્રયાઃ ।
તેષાં લોકાઁશ્ચ દેહાઁશ્ચ દાતુમર્હસિ વૈ મયિ ॥ ૨૧॥

લીલાવિભૂતિં શ્રીકૃષ્ણ યથાપૂર્વં પ્રકલ્પય ।
ચેતનાચેતનં કૃત્સ્નં જગત્સ્થાવરજઙ્ગમમ્ ॥ ૨૨॥

પશ્ય લીનં માયિકં વૈ મયિ સુપ્તં પ્રબોધય ।
પ્રકૃત્યા વૈ મયા સાર્ધં સૃજસ્વ પરમેશ્વર ॥ ૨૩॥

ધર્માધર્મૌ સુખં દુઃખં ભાવયિત્વા મયિ પ્રભો ।
મામધિષ્ઠાય વૈ લીલાં શ્રિયા કર્તું ત્વમર્હસિ" ॥ ૨૪॥

ઇત્યેવં ચાર્થિતશ્ચાઽહં લક્ષ્મિ પૂર્વં હિ માયયા ।
તસ્યામેવ હિ માયાયાં જગત્ સ્રષ્ટું પ્રચક્રમે ॥ ૨૫॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતાયાઃ દ્વાપરયુગસન્તાનાત્મકસ્ય તૃતીયખણ્ડે
૭૧-અધ્યાયાન્તર્ગતં મહામાયાકૃતં પુરુષોત્તમસ્તોત્રં સમ્પૂર્ણમ્ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૩। અધ્યાય ૭૧/૧૦-૨૫॥

lakShmInArAyaNIyasaMhitA . khaNDa 3. adhyAya 71/10-25..

Proofread by PSA Easwaran

*Mahamayakritam Purushottama Stotram*

pdf was typeset on February 28, 2026

Please send corrections to *sanskrit@cheerful.com*